वर्षम्-०४ अङ्कः-०४ शोधज्योतिः
जनवरी-दिसम्बर, २०२२ ISSN-2350-0700

काव्यालङ्कारकारिकायां काव्यकारणनिरूपणम्

डॉ. ललितकुमार पटेल[1]

प्रास्ताविकम्

कार्यं कदापि कारणं विना न भवति। कारणानि मिलित्वा किमपि कार्यम् उत्पादयन्ति। यथा जगति तथैव काव्येऽपि भवति। काव्यं तु केनचित् हेतुना उत्पद्यते। काव्यकारणविषये साहित्याचार्येषु अनेकानि मतानि वर्तन्ते। केषाञ्चित् मतानुसारं काव्यस्य अनेकानि कारणानि भवन्ति, केषाञ्चिच्च मतानुसारं विविधतत्त्वानि सम्मिल्य एकमेव कारणं जायते। अत्र पूर्वेषां साहित्याचार्याणां काव्यकारणविचारान् आदौ विमृशामः।

भामहाचार्यस्य मतानुसारं शास्त्राध्ययनं कर्तुं जडबुद्धिः जनः अपि शक्नोति। तत्र गुरूपदेशः एव आवश्यकः भवति किन्तु काव्यं तु कस्यचित् प्रतिभासम्पन्नस्य एव जायते।[2] अर्थात् काव्यकरणे प्रतिभायाः आवश्यकता भवति। प्रतिभावान् कविः यदि चिरस्थायीनीं कीर्तिम् इच्छति तर्हि तेन विविधानां शास्त्राणां ज्ञानं प्राप्तव्यम्। एतैः शास्त्रैः प्रतिभा उत्पद्यते तथा प्रतिभया काव्यम् उत्पद्यते इति भामहाचार्यस्य मतं वर्तते।[3]

आचार्यः वामनः काव्याङ्गानि निरूपयति। तानि काव्याङ्गानि काव्ये कारणरूपाणि सन्ति। त्रीणि काव्याङ्गानि सन्ति लोकः विद्या प्रकीर्णं चेति।[4] तत्र लोकः अर्थात् लोकस्य स्थावरजङ्गमात्मकस्य व्यवहारज्ञानम्।[5] शब्दशास्त्रम्, अभिधानकोशः, छन्दोविचितिः, कलाः, कामशास्त्रम्, दण्डनीतिश्च विद्याः

---

[1] प्र.कुलपतिः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

[2] गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्। काव्यं तु जायते जातु कस्यचित्प्रतिभावतः॥ भामहकृतकाव्यालङ्कारः १/५, प्रो. डॉ. रमेश म. शुक्ल, पार्श्व पब्लिकेशन, अहमदाबाद, २००६, पृ. ३९

[3] अतोऽभिवाञ्छता कीर्तिं स्थेयसीमाभुवः स्थितेः। यत्नो विदितवेधेन विधेयः काव्यलक्षणः॥ शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः। लोको युक्तिः कलाश्चेति मन्तव्या काव्यवैखरी॥ तत्रैव – १/८, ९, पृ. ४०

[4] लोको विद्या प्रकीर्णञ्च काव्याङ्गानि। वामनाचार्यः, काव्यालङ्कारसूत्रवृत्तिः १/३/१, डॉ. आर. पी. महेता, सरस्वती पुस्तक भण्डार, अहमदाबाद, २००७-०८, पृ. ४५

[5] लोकवृत्तं लोकः। तत्रैव – १/३/२, पृ. ४६

सन्ति।[६] प्रकीर्णम् अर्थात् काव्यपरिचयः, काव्यकरणप्रवृत्तिः, काव्यकर्तुः उपदेशः, तेन उपदेशेन शब्दानाम् आवापोद्धरणे, प्रतिभानं तथा अवधानम्।[७] एतत् सर्वं मिलित्वा काव्यकरणे सहायकं भवति। वामनः काव्यकारणसन्दर्भे सूक्ष्मतया विचारं कृत्वा एतानि तत्त्वानि प्रत्यपादयत् इति प्रतीयते।

आचार्यः मम्मटः काव्यप्रकाशे काव्यस्य हेतु सन्दर्भे त्रयः मिलित्वा एकं हेतुं स्वीकरोति। शक्तिः निपुणता अभ्यासः इति त्रयः सम्मिल्य काव्ये हेतुः भवति।[८] शक्तिः अर्थात् कवित्वबीजरूपः संस्कारःविशेषः, शक्त्या विना काव्यं न जायते इति तस्य मतम्। यदि शक्तिं विना काव्यं क्रियते तत् काव्यं हास्यायतनं भवति। लोकस्य शास्त्राणां च निपुणता व्युत्पत्तिः इति उच्यते। अभ्यासः अर्थात् काव्यकरणे कृतकाव्यानाम् उपदेशेन पुनः पुनः प्रवृत्तिः। एतत्त्रयमपि सम्भूय एक एव हेतुः, हेतवः न इति मम्मटस्य मतम्।[९] यथा कुम्भकारः घटं निर्माति तत्र दण्डः चक्रं चीवरं चेति त्रयाणामपि सहभागिता भवति, न तु एकस्य एव। तथैव काव्यकरणे शक्तिः निपुणता अभ्यासश्च मिलित्वा एकः हेतुः भवति इति तात्पर्यम्।

आचार्यः हेमचन्द्रः काव्यस्य कारणं प्रतिभां मनुते। प्रतिभया एव काव्यं जायते।[१०] व्युत्पत्तिः अभ्यासश्च प्रतिभायाः संस्कारकौ स्तः। प्रधानं कारणं तु प्रतिभा एव।[११] हेमचन्द्रः प्रतिभायाः द्वौ भेदौ प्रत्यपादयत् सहजा औपाधिकी चेति। आवरणभङ्गात् स्वतः उत्पन्ना प्रतिभा सहजा कथ्यते[१२] तथा मन्त्रदेवतादिकृपया जाता प्रतिभा औपाधिकी कथ्यते।[१३] एवम् आचार्यः हेमचन्द्रः प्रतिभां मुख्यं कारणं तथा व्युत्पत्त्यभ्यासौ तस्याः संस्कारकौ मनुते।[१४]

पण्डितराजः जगन्नाथः काव्यस्य कारणत्वेन केवलां प्रतिभामेव स्वीकरोति। सा प्रतिभा अर्थात् काव्यनिर्माणेन अनुकूलानां पदार्थानाम् उपस्थितिः।[१५] काव्यं निर्मातुकामस्य काव्यानुकूलपदार्थानाम् उपस्थितिः प्रतिभा, सा हि काव्ये हेतुः इति तात्पर्यम्।

---

[६] *शब्दस्मृत्यभिधानकोशाच्छन्दोविचितिकलाकामशास्त्रदण्डनीतिपूर्वा विद्याः। तत्रैव – १/३/३, पृ. ४६*

[७] *लक्ष्यज्ञत्वमभियोगी वृद्धसेवाऽवेक्षणं प्रतिभानमवधानं च प्रकीर्णम्। तत्रैव – १/३/११, पृ. ५०*

[८] *शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे॥ मम्मटः, काव्यप्रकाशः १/३, आचार्य विश्वेश्वर, ज्ञानमण्डल लिमिटेड, वाराणसी, २०१४, पृ. १६*

[९] *तत्रैव – १/३ वृत्तिः, पृ. १६, १७*

[१०] *प्रतिभाऽस्य हेतुः। हेमचन्द्रः, काव्यानुशासनम्– १/४, डॉ.रामानन्द शर्मा, चौखम्बा कृष्णदास अकादमी, वाराणसी, २०००, पृ. ०५*

[११] *इदं प्रधानं कारणम्। व्युत्पत्त्यभ्यासौ तु प्रतिभाया एव संस्कारकाविति वक्ष्यते। तत्रैव – १/४ वृत्तिः, पृ. ०५*

[१२] *सावरणक्षयोपशममात्रात्सहजा॥ तत्रैव – १/५, पृ. ०५*

[१३] *मन्त्रादेरौपाधिकी॥ तत्रैव – १/६, पृ. ०६*

[१४] *व्युत्पत्त्यभ्यासाभ्यां संस्कार्या॥ तत्रैव – १/७, पृ. ०६*

[१५] *तस्य च कारणं कविगता केवला प्रतिभा। सा च काव्यघटनानुकूलशब्दार्थोपरिस्थितिः। पण्डितराजः जगन्नाथः, रसगङ्गाधरः, प्रथमाननम्, पण्डित मदनमोहन झा, चौखम्बा विद्याभवन, वाराणसी, २०१३, पृ. २७*

एवं प्रकारेण अत्र केषाञ्चित् पूर्वाचार्याणां काव्यकारणमतानि अस्माभिः अवलोकितानि। केचन प्रतिभायाः महत्त्वं स्वीकुर्वन्ति केचन पुनः अभ्यासस्य व्युत्पत्तेश्च तत्र कारणत्वम् अङ्गीकुर्वन्ति। संक्षेपेण काव्यकारणविषये अधोलिखितानि तत्त्वानि ध्यातव्यानि –

⇒ काव्यार्थं प्रतिभा अतीव आवश्यकी
⇒ विविधानां शास्त्राणां ज्ञानं काव्याय नूनम् आवश्यकम्
⇒ काव्यकरणे वारं वारम् अभ्यासः आवश्यकः
⇒ ये काव्यं कर्तुं जानन्ति तेभ्यः उपदेशः प्राप्तव्यः

एतैः कारणैः सम्पन्नं काव्यं जगति यशःपात्रं भवति इति नास्ति संशयः। पूर्वाचार्याणां मतानि दृष्ट्वा आधुनिकानां विदुषां काव्यकारणविषये मतानि पश्यामः।

काव्यालङ्कारकारिकानुसारं काव्यकारणम्

आचार्य-रेवाप्रसादद्विवेदिनः मतानुसारं काव्ये प्रतिभा कारणम् अस्ति। प्रतिभा अर्थात् अर्थप्रतिभासनम्। तच्च अर्थप्रतिभासनम् उपमीयते द्विवेदिवर्येण- ''प्रज्ञाकादम्बिनीगर्भे यथा विद्युत उदयो भवति तद्वदेव अर्थप्रतिभासनं प्रज्ञागर्भस्य सोदरम्'' इति।[१६] कथनस्य तात्पर्यमस्ति यत् काव्यस्य कारणं प्रतिभा, सा प्रतिभा अर्थप्रतिभासनम्, तच्च अर्थप्रतिभासनं प्रज्ञारूपिण्याः कादम्बिन्याः गदुद्योतेन सह सञ्जातम् उत्पन्नम् अस्ति इति।

अर्थप्रतिभासनं व्याचिकीर्षुः सनातनकविराहवस्तुदर्शनम् अर्थप्रतिभासनम्। तद् वस्तुदर्शनम् अदृष्टचरं पूर्वमदृष्टम्, प्रथमवारमेव दृष्टं सत् अर्थप्रतिभासनम् उच्यते। किञ्च तद् वस्तुदर्शनम् अपूर्वकल्पितं भवेत्।[१७] अत्र वयं द्रष्टुं शक्नुमः यत् रेवाप्रसादद्विवेदिवर्यः प्रतिभानिरूपणविषये पण्डितप्रवरं जगन्नाथं नितराम् अनुसरति। पण्डितराजः जगन्नाथोऽपि काव्ये कारणं प्रतिभामेव अमन्यत।[१८] तन्मतानुसारं प्रतिभा नाम काव्यनिर्माणविधौ अनुकूलशब्दानामर्थानां च उपस्थितित्वम्।[१९] अर्थात् काव्ये प्रसङ्गानुगुणं शब्दप्रयोगः अर्थविन्यासश्च येन कविना साधु क्रियते स हि प्रतिभावान् कविः।

---

[१६] *कारणं प्रतिभा काव्ये सा चार्थप्रतिभासनम्। प्रज्ञाकादम्बिनीगर्भे विद्युदुद्योतसोदरम्॥ रेवाप्रसादः, काव्यालङ्कारकारिका – ०२, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, १९७७, पृ. ०९*

[१७] *अर्थप्रतिभासनं नाम अदृष्टपूर्वकल्पितादिवस्तु दर्शनम्। तत्रैव – ०२ वृत्तौ, पृ. ०९*

[१८] *तस्य च कारणं कविगता केवला प्रतिभा। जगन्नाथः, रसगङ्गाधरः, प्रथमाननम्, पण्डित मदनमोहन झा, चौखम्बा विद्याभवन, वाराणसी, २०१३, पृ. २७*

[१९] *सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः। तत्रैव, पृ. २७*

आचार्य-रेवाप्रसाद-द्विवेदी कारिकायाः उत्तरपदं वृतौ व्याकुर्वन् आह – रसगङ्गाधरे मङ्गलाचरणे कादम्बिन्याः यद् वर्णनं जगन्नाथेन कृतं तत्र प्रतिभया जगन्नाथस्य प्रज्ञा एव दीप्यते। तस्याः प्रज्ञायाः कादम्बिन्याः विद्युन्माला या वर्तते तया सह उत्पन्नम् अर्थप्रतिभासनम् तत्त्वेन अध्यवसिता श्रीकृष्णमूर्तिः इत्यर्थोपस्थितिः एव प्रतिभा।[२०] यथा कादम्बिन्याः विद्युदुद्योतस्य च अविनाभावसम्बन्धो विद्यते तथैव प्रज्ञायाः अर्थप्रतिभासनस्य चास्ति अविनाभावसम्बन्धः।[२१]

प्रज्ञा-प्रतिभासने कादम्बिनी-विद्युदुद्योतयोः दृष्टान्ते न निरूप्य दृष्टान्तान्तरेण पुनरपि निरूपयन्नाह आचार्यः रेवाप्रसादः – यथा नारदः स्वस्य पूर्वस्मिन् जन्मनि भगवतः कृपाप्रसादमवाप्य द्वितीये जन्मनि तस्याः कृपायाः फलत्वेन भगवतो दर्शनं चकार तथैव इयं प्रतिभा जन्मान्तरसंस्कारम् अपेक्षते।[२२] एषा प्रतिभा क्वचित् योगिनामपि अभिलक्ष्यते। समाधौ वर्तमानानां योगिनां हृदये या ज्योतिष्मती प्रवृत्तिरुदेति सा प्रतिभायाः स्वसा कथ्यते।[२३] प्रतिभायाः बीजं कुत्रचित् समाधिरपि दृश्यते। उक्तं च योगसूत्रेषु भगवता पतञ्जलिना-विशोकावा ज्योतिष्मती,[२४] तत्र शब्दार्थविकल्पैः सङ्कीर्णा सविकल्पा समापत्तिः,[२५] ऋतम्भरा तत्र प्रज्ञा,[२६] प्रातिभाद् वा सर्वम्[२७] इति च। अत एव रेवाप्रसादो ब्रूते यत् शङ्कराचार्यप्रभृतयः योगिनः अपि कवयः दृश्यन्ते[२८] यतो हि प्रतिभायाः उपकारकः समाधिः भवति।

इयं प्रतिभा रेवाप्रसादमते द्विविधा – स्वयम्भूः सहेतुश्च। तत्र स्वयम्भूः प्रतिभा आदिकवेः वाल्मीकेः तथा सहेतुः प्रतिभा अन्यत्र कविगता वर्तते।[२९] प्रथमायाः प्रतिभायाः विषये पूर्वकारिकासु उक्तमेव नारदादिदृष्टान्तेन द्वितीया प्रतिभा कालिदासादिषु कविषु दृश्यते। कालिदासः स्वयं भगवतीप्रसादात् प्रसिद्धः कविर्बभूव। त्रिविक्रमभट्टश्च सरस्वत्याः प्रसादेन नलचम्प्वा रचनां व्यधात्। श्रीहर्षोऽपि चिन्तामणिमन्त्रप्रभावात् कृतनैषधकाव्यः।[३०] एवं प्रतिभा सहेतुः कस्याश्चित् देवतायाः प्रसादफलीभूता दृश्यते।

---

[२०] कादम्बिनीसादृश्येन प्रज्ञायाः सरसत्वं पूर्णत्वं च, विद्युत् उद्योतस्य सादृश्येन च प्रतिभासनं चित्रितम्। रेवाप्रसादः, काव्यालङ्कारकारिका – ०२ वृत्तौ, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, १९७७, पृ. १०

[२१] अविनाभावोऽत्र विवक्षितः कादम्बिनी-विद्युदुद्योतयोः..... । तत्रैव – ०२ वृत्तौ, पृ. १०

[२२] नारदादि-कृपापात्र-चेतोधातौ जगत्प्रभोः। प्रथमं स्व-स्वरूपस्य दर्शनं यत् तदीदृशम्॥ तत्रैव – ०३ वृत्तौ, पृ. ११

[२३] समाधौ योगलग्नानां हृदये विषयान्विता। ज्योतिष्मती प्रवृत्तिर्या तत्स्वसा प्रतिभा कवेः॥ तत्रैव – ०४ वृत्तौ, पृ. १३

[२४] पातञ्जलयोगसूत्रम् – १/३६, प्यारेलाल प्रभुदयाल, भारतीय कला प्रकाशन, दिल्ली, २००६, पृ. १८

[२५] तत्रैव – १/४२, पृ. २१

[२६] तत्रैव – १/४८, पृ. २५

[२७] तत्रैव – १/३३, पृ. ८२

[२८] रेवाप्रसादः, काव्यालङ्कारकारिका – ०४ वृत्तिः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, १९७७, पृ. १४

[२९] स्वयम्भूश्च सहेतुश्चेत्यसौ लोके द्विधा स्थिता। आदिमोऽऽदिकवौ दृष्टा द्वितीयाऽन्यत्र दृश्यते॥ तत्रैव – ०५, पृ. १५

[३०] तत्रैव – ०५ वृत्तिः, पृ. १५, १६

द्वितीयायाः प्रतिभायाः अनेकानि कारणानि भवन्ति किन्तु तस्याः एकमेव कारणं भवति – सत्वोद्रेकः।[३१] कानि कारणानि भवन्ति इत्यत्राह आचार्यो रेवाप्रसादः – अदृष्टम्, व्युत्पत्तिः, अभ्यासश्चेति त्रयः प्रकाशकारेण रसगङ्गाधरकारेण च उक्ताः। मम्मटमते तु त्रयाणामपि मिलित्वा कारणत्वम्, जगन्नाथमते तावत् सर्वेषां प्रतिभां प्रति कारणत्वम्। किन्तु रेवाप्रसादमते सर्वेषाममीषां प्रतिभां प्रति कारणत्वमेव।[३२] अदृष्टं यदुक्तं तस्य भेदद्वयम् – जन्मान्तरीया महापुरुषप्रसादजन्या शक्तिः इति। व्युत्पत्तिरपि द्विधा – विविधग्रन्थामामधीत्या लब्धा अथ च काव्यकरणे पौनः पुन्येन प्रवृत्त्या उपलब्धा। एवं प्रतिभां प्रति एतेषां करणत्वं निश्चप्रचम्।[३३]

प्रतिभायाः कारणं तु सत्वोद्रेकः। यदुक्तं विश्वनाथेन दर्पणकृता-''रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते''[३४] तदेव भङ्ग्यन्तरेण ब्रूते रेवाप्रसादः – रजस्तमोभ्याम् अतीता या अवस्थितिः भवति सा प्रतिभां प्रति सत्वोद्रेकः इति नाम्नी भवति। तेनैव सत्त्वोद्रेकेण प्रतिभा वैचित्र्यं प्राप्नोति।[३५] एकस्य कवेः काव्ये यः अर्थः उपनिबध्यते तम्वार्थम् अन्यः कविः स्वकाव्ये भङ्ग्यन्तरेण उपनिबध्नाति तत्र कारणं केवलं कविगता प्रतिभा।[३६] अस्मिन्नेव सन्दर्भे ध्वनिकारेण उक्तं यत् –

''वाचस्पतिसहस्राणां सहस्रैरपि यत्नतः।
निबद्धा सा क्षयं नैति प्रकृतिर्जगतामिव॥''[३७]

एवं रेवाप्रसादानुसारं काव्ये प्रतिभा एव कारणम्। द्विविधा प्रतिभा तत्र प्रोक्ता, आद्या स्वयम्भूः आदिकवेः वाल्मीकेः अन्या सहेतुः अन्येषु कविषु इति। पण्डितवर्यस्य रेवाप्रसादस्य मतानुसारं द्विविधा प्रतिभा इत्थमत्र प्रतिपादिता।

सन्दर्भग्रन्थाः

१. भामहकृत-काव्यालङ्कारः, प्रो. डॉ. रमेश म. शुक्ल, पार्श्व पब्लिकेशन, अहमदाबाद,२००६
२. वामनाचार्यः, काव्यालङ्कारसूत्रवृत्तिः, डॉ. आर. पी. महेता, सरस्वती पुस्तक भण्डार, अहमदाबाद, २००७-०८

[३१] द्वितीया या भवन्त्यत्र करणानि बहून्यपि। कारणं तु भवत्यत्र सत्त्वोद्रेको हि केवलः॥ तत्रैव – ०६, पृ. १७
[३२] तत्रैव – ०६ वृत्तिः, पृ. १७
[३३] तत्रैव – ०६ वृत्तिः, पृ. १८
[३४] विश्वनाथः, साहित्यदर्पणः ३/३ वृत्तिः, डॉ. सत्यव्रतसिंह, चौखम्बा विद्याभवन, वाराणसी, २०१०, पृ. ८६
[३५] रजस्तमोनुवेधानां सङ्ख्यातीता तु या स्थितिः। उद्रेकोऽप्यनया सोऽप्यमतिवैचित्र्यमश्नुते॥ तत्रैव – ०७, पृ. २०
[३६] एकस्यापि कवेः काव्यप्रबन्धे येन दृश्यते। बन्धभेदो मधूद्याने वृक्ष-श्री-भेदसोदरः॥ तत्रैव – ०८, पृ. २०
[३७] आनन्दवर्धनः, ध्वन्यालोकः ०४/१०, आचार्य जगन्नाथ पाठक, चौखम्बा विद्याभवन, वाराणसी, २०११ पृ. ४९३

३. मम्मटः, काव्यप्रकाशः, आचार्य विश्वेश्वर, ज्ञानमण्डल लिमिटेड, वाराणसी, २०१४
४. हेमचन्द्रः, काव्यानुशासनम्, डॉ. रामानन्द शर्मा, चौखम्बा कृष्णदास अकादमी, वाराणसी, २०००
५. पण्डितराजजगन्नाथः, रसगङ्गाधरः, प्रथमाननम्, पण्डित मदनमोहन झा, चौखम्बा विद्याभवन, वाराणसी, २०१३
६. रेवाप्रसादद्विवेदी, काव्यालङ्कारकारिका, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, १९७७
७. पातञ्जलयोगसूत्रम्, प्यारेलाल प्रभुदयाल, भारतीय कला प्रकाशन, दिल्ली, २००६
८. विश्वनाथः, साहित्यदर्पणः, डॉ. सत्यव्रतसिंह, चौखम्बा विद्याभवन, वाराणसी, २०१०
९. आनन्दवर्धनः, ध्वन्यालोकः, आचार्य जगन्नाथ पाठक, चौखम्बा विद्याभवन, वाराणसी, २०११

~~~~~~~~~~~
~~~~~~~~~~~